Digitized by Panjab Digital Library | www.panjabdigilib.org

दपतिः वृषलपत्नी वृषलपतिः । अथ वृषलस्य पत्नीति व्यस्ते कथमिति चेत् पत्नीव पत्नीत्युपचारात् यथा आचार्याणि वेता
कर्त्तरि क्विप् अश्विं स्वपदे पत्नियो पत्नीय इतीयङ्कुष्पदे विज्ञेयः सपत्न्यस्य किं गवां पतिः स्त्री नित्यं सपत्न्यादिषु पूर्वविक
ल्पापवादः समा ॰ नस्य सभावो पि निपात्यते समानः पतिर्यस्याः सा सपत्नी एकपत्नी वीरपत्नी पूतक्रतोरै च इयं त्रिसू
त्री पुंयोगे एवेष्यते पूतक्रतोः स्त्री पूतक्रतायी यया तु क्रतवः पूताः पूतक्रतुरेव सः वृषाकप्यग्निकुसितकुसिदानामु
दात्तः एषामुदात्त ऐ आदेशः स्यान्ङीप् च वृषाकपेः स्त्री वृषाकपायी हरविष्णु वृषाकपी इत्यमरः वृषाकपायी स्त्री श्रीगौर्यो
रिति च अग्नायी कुसितायी कुसिदायी कुसिदशब्दोऽकारान्तमध्योदात्तो दीर्घमध्यः मनोरौ वा मनुशब्दस्यौकारादेशः स्यात्
उदात्त ऐकारश्च वा तत्संनियोगशिष्टो ङीप् च मनोः स्त्री मनायी मनावी मनुः वर्णादनुदात्तात्तोपधात्तो नः वर्णवाचिनोऽनु
दात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् स्यात् तकारस्य नकारादेशश्च एता एनी रोहिता रोहिणी व
र्णानां तणतिनितान्तानामिति फिट्सूत्रेणाद्युदात्तः त्रेण्या च त्राल्लोप इत्यादौ त्रीण्येता नि श्यात् इति वक्तव्याः अनु
दात्तात् किं श्वेता घृतादीनां चेत्यन्तोदात्तोऽयं अश इत्येव शितिः स्त्री पिशङ्गा उपसंख्यानं पिशङ्गी असितपलितयोर्न अ
सिता छन्दसि क्नमेके असिक्नी पलिक्नी अवदातशब्दस्तु न वर्णवाची किं तु विशुद्धवाची तेनावदातेत्येव अन्यतो ङी
ष् तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात्प्रातिपदिकात्स्त्रियां ङीष् स्यात् कल्माषी सारङ्गी लघावन्ते द्वयोश्च बह्वषो गुरु
रिति मध्योदात्तावेतौ अनुदात्तान्तात् किं कृष्णा कपिला षिद्गौरादिभ्यश्च षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात् नर्तकी गौरी अन
डुही अनड्वाही पिप्पल्यादयश्च आकृतिगणोऽयं सूर्यातिष्ययागस्त्यमत्स्यानां य उपधायाः अङ्गस्योपधायाः यस्य लोपः
स्यात्तत्रेषु सूर्या ॰ घवय्वः मत्स्यङ्ग्यां सूर्याऽगस्त्ययोश्छे च ङ्यां च तिष्यपुष्ययोर्नक्षत्राणि यलोपस्तिवाच्य मत्सी

Digitized by Panjab Digital Library | www.panjabdigilib.org

मातरिपित्रेतिपित्राद्देवसिद्धे गौरादिषुमातामहीशब्दपाठादनित्यः । विनोऽङीष् इंद्रा जानपदकुंडगोणस्थलभाज
नागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादना, योविकारमैथुनेच्छाकेशवेशेषु एका
दशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिविषयेषु ङीष् स्यात् जानपदी वृत्तिश्चेत् अन्या तु जानपदी उत्सादित्वादणंतत्वेनटिड्ढेतिङी
प् । हृदादः कुंडी अमत्रं चेत् कुंडान्या कुंडीदाहेपुरीश्वरलइति अपवत्पदः यस्कं अमत्रेडारडः कुंडइतिमनुष्यजातिव
चनस्वतोजातिलक्षणोङीष्चवत्येव अमत्रेहिस्त्री विषयत्वादप्राप्तोङीषिधीयते न तु नियम्यते गोणी आवपनं चेत् गोणान्या स्थ
ली अकृत्रिमा चेत् स्थलान्या भाजी श्राणा चेत् भाजान्या नागी स्थूला चेत् नागान्या गजवाचीनागशब्दः स्थौल्यगुणयोगादन्य
त्रप्रयुक्तउदाहरणं सर्पवाचीतुदैर्घ्यगुणादन्यत्रप्रयुक्तः प्रत्युदाहरणं काली वर्णश्चेत् कालान्या नीली अनाच्छादनं चेत् नी
लान्या नील्या रक्तसाटीत्यर्थः नील्या अन्वक्तव्य इत्यत्र अनाच्छादनेऽपि न सर्वत्र किंतु नीलादोषधौ नीलीप्राणिनि च नीलीगौः सं
ज्ञायांवा नीली नीला कुशी अयोविकारश्चेत् कुशान्या कामुकी मैथुनेच्छा चेत् कामुकान्या कबरी केशानांसंनिवेशविशेषः
कबरान्या चित्रेत्यर्थः शोणात्प्राचां शोणी शोणा वोतोगुणवचनात् उदंतात् गुणवाचिनो वा ङीष् स्यात् मृद्वी मृदुः उतः किं शुचिः शु
चितिकिं आखुः खरुसंयोगोपधात् खरुः पतिंवरा कन्या पाण्डुः बह्वादिभ्यश्च एभ्यो वा ङीष् बह्वी बहुः कृतिकारादक्तिनः रात्रिः
रात्री सर्वतोऽक्तिन्नर्थादित्येके शकटिः अक्तिन्नर्थात् किं अजननिः कृदिकारादपीति विकल्पं पद्धतिशब्दोगणपद्यते हिमं हरि +काचि+
इतिवेतिपक्षे वः पुंयोगादाख्यायां पुंयोगात्स्त्रियां वर्तते ततो ङीष् स्यात् गोपस्यस्त्री गोपी पालकान्तान्न गोपालि ३०
का अश्वपालिका सूर्याद्देवतायां चाप्वाच्यः सूर्यस्य स्त्री देवता सूर्या देवतायां किं सूरी कुन्ती मानुषीयं इन्द्रवरुणभव
शर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् एषामानुगागमः स्यात् ङीष् च इन्द्रादीनां पञ्चानां मातुलाचार्ययोश्च

Digitized by Panjab Digital Library | www.panjabdigilib.org

पुंयोग एवेष्यते तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते इतरेषां तु ङीषानुकौ सह इंद्राणी हिमारण्ययोर्महत्त्वे महद्धिमं हिमानी
अरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्यां यवनानां लिपिर्यवनानी मातुलोपाध्याययोरानुग्वा मातुलानी मातुली उपा
ध्यायानी उपाध्यायी आनुक् स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः उपाध्यायी उपाध्याया आचार्यादणत्वं च आचार्यस्य स्त्री आचार्या
नी पुंयोग इत्येव आचार्या स्वयं व्याख्यात्री अर्यक्षत्रियाभ्यां वा स्वार्थे अर्याणी अर्या स्वामिनी वैश्या वेत्यर्थः क्षत्रियाणी अर्या क्ष
त्रिया कथं तु सूर्याणीति तु स्त्राणमानयतीङीवयतीति कर्मण्यण् क्रीतात्करणपूर्वात् क्रीतांताददंतात्करणादेः स्त्रियां ङीष्स्यात्
वस्त्रक्रीती क्वचिन्न धनक्रीता क्तादल्पाख्यायां करणादेः क्तांताददंताद्ङीष्स्यादल्पत्वे द्योत्ये अभ्रलिप्ती द्यौः बहुव्रीहेश्चांतोदा
त्तात् बहुव्रीहेः क्तांताददंतात्स्त्रियां ङीष्स्यात् जातिपूर्वादिति वक्तव्यं तेन न बहुकृता सुखादिपूर्वान्न कृकल
ल्नी नेदं बहुक्रीता ङातांतान्न दंतजाता पाणिगृहीती तीं भार्यां पाणिगृहीतान्या अस्वांगपूर्वपदाद्वा पूर्वेण नित्ये प्राप्ते विक
ल्पोयं सुरापीती सुरापीता अंतोदात्तात्किं वस्त्रछिन्ना अनाच्छादनादित्यस्य दात्ते निषेधः अत एव पूर्वेणापि न ङीष् स्वांगाच्चोप
सर्जनादसंयोगोपधात् असंयोगोपधमुपसर्जनं यत्स्वांगं तदंतादंतात्प्रातिपदिकाद्वा ङीष्स्यात् केशानतिक्रांता अतिके
शी अतिकेशा चंद्रमुखी चंद्रमुखा संयोगोपधात्तु सुगुल्फा उपसर्जनात्किं शिखा स्वांगं त्रिधा अद्रवं मूर्तिमत्स्वांगं प्राणिस्थ
मविकारजं सुस्वेदा द्रवत्वात् सुज्ञाना अमूर्तत्वात् सुमुखा शाला अप्राणिस्थत्वात् सुशोफा विकारजत्वात् अतत्स्थं तत्र दृष्ट
च सुकेशी सुकेशा वा रथ्या अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् तेन चेत् सुस्तनी सुस्तना प्रतिमा प्राणिवत्प्राणिसदृ
शे स्थितत्वात् नासिकोदरौष्ठजंघादंतकर्णशृंगाच्च एभ्यो वा ङीष् आद्यद्वयं बह्वज्लक्षणनिषेधबाधनार्थं पुरस्तादपवा
दन्यायात् ओष्ठादीनां पंचानां तु असंयोगोपधादिति निषेधं मध्येपवादन्यायात् संयोगलक्षणस्य निषेधं परत्वादस्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

बाधकः तुंगनासिकी तुंगनासिका इत्यादि नेदं सहनासिका अत्र वृत्तिः अंगगात्रकंठेभ्यो वक्तव्यं स्वंगी स्वंगेत्यादि पृथग्ग्रहणानुक्त
समुच्चयार्थेन चकारेण संयोगोपधान्नेति केचिन्न लाभाद्यनुक्तं बाधप्रमाणमिदमिति प्रामाणिकाः अत्र वार्तिकानि पुच्छाच्च सुपुच्छी सु
पुच्छा कबरमणिविषशरेभ्यो नित्यं कबरं चित्रं पुच्छमस्याः कबरपुच्छीत्यादि उपमानात्पक्षाच्च पुच्छाच्च नित्यमित्येव उलूकपक्षी शा
ला उलूकपुच्छी सेना न क्रोडादिबह्वचः क्रोडादेर्बह्वचश्च स्वांगान्न ङीष् कल्याणक्रोडा अश्वानामुरः क्रोडा आकृतिगणोयं सु
जघना सहनञ्विद्यमानपूर्वाच्च सहेत्यादित्रिकपूर्वान्न ङीष् सकेशा अकेशा विद्यमानकेशा नखमुखात्संज्ञायां न ङीष् स्या
त् शूर्पणखा गौरमुखा संज्ञायां किं ताम्रमुखी कन्या दिक्पूर्वपदान्ङीप् दिक्पूर्वपदात्स्वांगांतात्प्रातिपदिकात्परस्य ङी
षो ङीबादेशः स्यात् प्राङ्मुखी आद्युदात्तं पदं वाहः वाहंतात्प्रातिपदिकान्ङीष् ऊठ् एवानुवर्तते न ङीप् दित्यवाड् इति दित्यौही व
मे सख्यशिश्वीति भाषायां इति निपातः ईकारेण भाषायामित्यस्यानंतरं उदात्तः तेन छंदसि पक्षे सखी अशिश्वी आवेन बाधन
येतम शिश्वी जातेरस्त्रीविषयादयोपधात् जातिवाचि यन्न च स्त्रियां नियतम् अयोपधं ततः स्त्रियां ङीष् स्यात् आकृतिग्रहणा
जातिः अनुगतसंस्थानव्यंग्येत्यर्थः तटी लिंगानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या असर्वलिंगत्वे सत्येकस्यां व्यक्तौ कथ
नाद्व्यक्त्यंतरे कथनं विनापि सुग्रहा जातिरिति लक्षणांतरं वृषली सत्यं तर्हि किं शुक्रा सकृदित्यादि किं देवदत्ता गोत्रं च चरणैः स
पत्र ह अपत्यप्रत्ययांतः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः औपगवी कठी बह्वृची ब्राह्मणी स्वबंधु शार्ङ्गरवादियावान्
न ङीष् द्विधा ध्यते जातेः किं मुंडा अस्त्रीविषयात्किं बलाका अयोपधात्किं क्षत्रिया योपधप्रतिषेधे गवयहयमुकयमनुष्य ३१
मत्स्यानामप्रतिषेधः गवयी हयी मुकयी हलस्तद्धितस्येति यलोपः मनुषी मत्स्यस्य ङ्यां मत्सी पाककर्णपर्णपुष्पफलमूल
वालोत्तरपदाच्च पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात् ओदनपाकी शंकुकर्णी शालपर्णी शंखपुष्पी

Digitized by Panjab Digital Library | www.panjabdigilib.org

दासीफली दर्भमूली गोवाली उपधिविशेषणं दार्थते इतो मनुष्यजातेः ङीष् स्यात् दाक्षी योपधादपि उदमेयस्याः पत्यं अ
दमेयी मनुष्येति किं तित्तिरिः ऊङुतः उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात् कुरूः कुरुनादित्वाण्ण्य
ः तस्य स्त्रियामवन्तीत्यादिना लुक् अयोपधा किं अध्वर्युर्ब्राह्मणी अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानं रज्ज्वादिपर्यु
दासाउवर्णेनित्यएव अलाबू कर्कन्धू अनयोर्दीर्घान्तत्वेपि नोङ्धात्वोरिति निषेधबाधनार्थं प्रतिषेधकऊङः फलं प्राणिजाति
स्तु कृकवाकुः रज्ज्वादिस्तु रज्जुः हनुः बाह्वन्तात्संज्ञायां स्त्रियामूङ् मद्रबाहूः संज्ञायां किं वृत्तबाहुः पंगोश्च पंगूः श्वसुरस्यो
काराकारलोपश्च वाच्यः ऊङो गलक्षणस्य ङीषोपवादः लिंगविशिष्टपरिभाषयास्यादयः श्वश्रूः ऊरूत्तरपदादौपम्ये
उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात् करभोरूः संहितशफलक्षणवामादेश्च अनौपम्यार्थं
सूत्रं संहितोरूः सेवशफोरूः शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात् लक्षणशब्दादर्शआद्यच् लक्षणोरूः वामोरूः
सहितसहाभ्यां चेति वक्तव्यं हितेन सह सहितो ऊरू यस्याः सा सहोरूः यद्वा विद्यमानवचनस्य सहशब्दस्य ऊर्वेति वाच्यप्रतिपादना
यप्रयोगः संज्ञायां कद्रुकमण्डल्वोः संज्ञायां स्त्रियामूङ् कद्रूः कमण्डलूः संज्ञायां किं कद्रुः कमण्डलुः अत्र दीर्घवचने शार्ङ्गरवा
द्यञो ङीन् शार्ङ्गरवादेरञो यः कारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात् शार्ङ्गरवी वैदी जातेरित्यनुवृत्तेः पुंयोगे ङीषेव नरस्यो
दिश्चेति गणसूत्रं नारी यङश्चाप् यङन्तात्स्त्रियां चाप् स्यात् ष्यङ् ष्यङोः सामान्यग्रहणं आंबष्ठ्या कारीषगन्ध्या षाद्यञश्चाब्राह्म्यः
यौतिमाप्या आवट्याच्च अस्माच्चाप् स्यात् यञश्चेति ङीपोपवादः अवटशब्दो गर्गादिः आवट्या तद्धिताः आपञ्चमसमाप्तेरधिका
रोयं यूनस्तिः युवन्शब्दात्स्त्रियां तिप्रत्ययः स्यात् स च तद्धितः लिंगविशिष्टपरिभाषया सिद्धे तद्धिताधिकारार्थं युवतिः अनु
पसर्जनादित्येव बहवो युवानो यस्यां बहुयुवा युवतीत्युक्तेः त्वात्तान्ङीपि बोध्यम् ॥इति स्त्रीप्रत्ययाः॥ २५ प्रातिप

Digitized by Panjab Digital Library | www.panjabdigilib.org

दिकार्थलिंगपरिमाणवचनमात्रेप्रथमा नियतोपस्थितिकः प्रातिपदिकार्थः मात्रशब्दस्यप्रत्येकंयोगः प्रातिपदिकार्थमात्रेलि
गमात्राद्याधिक्येसंख्यामात्रेचप्रथमास्यात् उच्चैः नीचैः कृष्णः श्रीः ज्ञानं अलिंगानियतलिंगाश्चप्रातिपदिकार्थमात्रइत्यस्यो
दाहरणं अनियतलिंगास्तुलिंगमात्राधिक्यस्य तटः तटी तटं परिमाणमात्रे द्रोणोव्रीहिः द्रोणरूपंयत्परिमाणंतत्परिछिन्नो
इत्यर्थः प्रत्ययार्थेपरिमाणेप्रकृत्यर्थोऽभेदेनसंसर्गेणविशेषणं प्रत्ययार्थस्तुपरिच्छेद्यपरिछेदकभावेनव्रीहौविशेषण
मितिविवेकः वचनंसंख्या एकः द्वौबहवः इहउक्तार्थत्वाद्विभक्तेरप्राप्तौवचनं संबोधनेच इहप्रथमास्यात् हेराम कारके इत्य
धिकृत्य कर्तुरीप्सिततमंकर्म कर्तुः क्रिययाप्तुमिष्टतमंकारकंकर्मसंज्ञंस्यात् कर्तुः किं माषेष्वश्वंबध्नाति कर्मणः ईप्सिता
माषानकर्तुः तमब्ग्रहणंकिं पयसाओदनंभुंक्ते कर्मेत्यनुवृत्तौ कर्मण्यित्येवाधारनिरूप्यार्थं अनभिहितेइदंप्रविज्ञानीत्वत्रैवस्या
त् अनभिहितेइत्यधिकृत्य कर्मणिद्वितीया अनुक्तेकर्मणिद्वितीयास्यात् हरिंभजति अभिहितेतुकर्मणिप्रातिपदिकार्थ
इति॰ मात्रेप्रथमेव अभिधानंप्रायेणतिङ्कृत्तद्धितसमासैः तिङ् हरिःसेव्यते कृत् लक्ष्म्यासेवितः तद्धितः शतेनक्रीतः शत्यः स
मासः प्राप्तआनंदोयंप्राप्तानंदः क्वचिन्निपातेनाभिधानं यथाविषवृक्षोपिसंवर्ध्यस्वयंछेत्तुमसांप्रतं असांप्रतमित्यस्यार्थःप्रयुज्य
तेइत्यर्थः तथायुक्तंचानीप्सितं ईप्सिततमवत्क्रिययायुक्तमनीप्सितमपिकारकंकर्मसंज्ञंस्यात् ग्रामंगछन्तृणंस्पृशति
विषंभुंक्ते अकथितंच अपादानादिविशेषैरविवक्षितंकारकंकर्मसंज्ञंस्यात् दुह्याच्पच्दंड्रुधिप्रछिचिब्रूशासुजिमथमुषां
कर्मयुक्स्यादकथितंतथास्यान्नीहृकृष्वहां दुहादीनांद्वादशानांतथानीप्रभृतीनांचतुर्णांकर्मणायद्युज्यतेतदेवाकथितंकर्मे ३२
तिपरिगणनंकर्तव्यमित्यर्थः गांदोग्धिपयः बलिंयाचतेवसुधां अविनीतंविनयंयाचते तंडुलानोदनंपचति गर्गान्शतंदंड
तिव्रजमवरुणद्धिगां माणवकंपंथानंपृछति वृक्षमवचिनोतिफलानि माणवकंधर्मंब्रूतेशास्तिवा शतंजयतिदेवदत्तं सुधां

Digitized by Panjab Digital Library | www.panjabdigilib.org

क्षीरधिं मथ्नाति देवदत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वा अर्थनिबंधनेयं संज्ञा बलिं भिक्षते वसुधां माण-
वकं धर्मं भाषते अभिधत्ते वक्तीत्यादि कारकं किं माणवकस्य पितरं पंथानं पृच्छति अकर्मकधातुभिर्योगे देशः कालो भावो गंत-
व्योऽध्वा च कर्मसंज्ञक इति वाच्यं कुरून्स्वपिति मासमास्ते गोदोहमास्ते गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता
स णौ गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात् शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् आ-
शयच्चामृतं देवान् वेदमध्यापयद्विधिं आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः गत्यादीति किं पाचयत्योदनं देवदत्तेन
अण्यंतानां किं गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुंक्ते गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः नीवह्योर्न नाययति वा-
हयति वा भारं भृत्येन नियंतृकर्तृकस्य वहेरनिषेधः वाहयति रथं वाहान्सूतः आदिखाद्योर्न आदयति खादयति वान्नं बटु-
ना भक्षेरहिंसार्थस्य न भक्षयत्यन्नं बटुना अहिंसार्थस्य किं भक्षयति सस्यं बलीवर्दान् जल्पतिप्रभृतीनामुपसंख्यानं जल्पय-
ति भाषयति पुत्रं देवदत्तः दृशेश्च दर्शयति हरिं भक्तान् सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्यनेन ज्ञाप्य-
ते तेन स्मरति जिघ्रत्यादीनां न स्मारयति घ्रापयति देवदत्तेन शब्दाययतेर्न शब्दाययति देवदत्तेन धात्वर्थसंगृहीतकर्मत्वेनाकर्मक-
त्वात्प्राप्तिः येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः न त्वविवक्षितकर्माणोऽपि तेन मासमासयति देवदत्तमित्यादौ क-
र्मत्वं भवति देवदत्तेन पाचयतीत्यादौ तु न हृक्रोरन्यतरस्याम् हृक्रोरणौ वा कर्म स्यात् हारयति कारयति वा भृत्यं भृत्येन वा क-
टं अभिवादिदृशोरात्मनेपदे वेति वाच्यं अभिवादयते दर्शयते देवं भक्तं भक्तेन वा अधिशीङ्स्थासां कर्म अधिपूर्वाणामेषामा-
धारः कर्म स्यात् अधिशेते अधितिष्ठति अध्यास्ते वा वैकुंठं हरिः अभिनिविशश्च अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म
स्यात् अभिनिविशते सन्मार्गं परिक्रयणे संप्रदानमिति सूत्रादिह मंडूकप्लुत्यान्यतरस्यांग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रय

Digitized by Panjab Digital Library | www.panjabdigilib.org

णात्कश्चिन्न पापे लिप्यते॥ उपान्वध्याङ्वसः उपादिपूर्वस्य वसतेराधारः कर्मस्यात् उपवसति अनुवसति अधिवसति आव
सति वा वैकुंठं हरिः अभुक्त्यर्थस्य न वने उपवसति उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोन्यत्रापि
दृश्यते उभयतः कृष्णं गोपाः सर्वतः कृष्णं धिक् कृष्णाभक्तं उपर्युपरि लोकं हरिः अध्यधि लोकं अधोधो लोकं अभितः परित
ः समया निकषा हा प्रतियोगेपि अभितः कृष्णं परितः कृष्णं ग्रामं समया निकषा हा कृष्णाभक्तं तस्य शोच्यते त्यर्थः बुभुक्षितं
न प्रतिभाति किंचित् अंतरांतरेण युक्ते आभ्यां योगे द्वितीया स्यात् अंतरा त्वां मां हरिः अंतरेण हरिं न सुखं कर्मप्रवचनीयाः इ
त्यधिकृत्य अनुर्लक्षणे लक्षणे द्योत्ये अनुरुक्तसंज्ञः स्यात् गत्युपसर्गसंज्ञापवादः कर्मप्रवचनीययुक्ते द्वितीया एतेन यो
गे द्वितीया स्यात् जपमनुप्रावर्षत् हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः परापि हेतौ तृतीया बाधते लक्षणेत्थंभूतेत्यादि
ना सिद्धे पुनः संज्ञाविधानसामर्थ्यात् तृतीयार्थे अस्मिन्द्योत्ये अनुरुक्तसंज्ञः स्यात् नदीमन्ववसिता सेना नद्या सह संबद्धे
त्यर्थः हीने हीने द्योत्ये अनुरुक्तसंज्ञः स्यात् अनु हरिं सुराः हरेर्हीना इत्यर्थः उपोधिके च अधिके हीने च द्योत्ये उ
पेत्युक्तसंज्ञः स्यात् अधिके सप्तमी वक्ष्यते हीने उप हरिं सुराः लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः एष्वर्थेषु
विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः लक्षणे वृक्षं प्रति पर्यनु वा विद्योतते विद्युत् इत्थंभूताख्याने भक्तो विष्णुं प्रति परि
अनु वा भागे लक्ष्मीर्हरिं प्रति परि अनु वा हरेर्भाग इत्यर्थः वीप्सायां वृक्षं वृक्षं प्रति परि अनु वा सिंचति अत्रोपसर्गत्वाभावान्न ष त्वं
त्वं एषु किं परिषिंचति अभिरभागे भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात् हरिमभि वर्तते भक्तो हरिमभि पर्यायगच्छति गति
संज्ञाबाधात् गतिर्गतौ इति निघातो न स्युः स्फुरता देवं देवमभि सिंचति अभागे किं यदत्र ममाभिष्यात्तद्दीयतां अधिपरी अन
र्थकौ उक्तसंज्ञौ स्तः कुतोध्यागच्छति कुतः पर्यागच्छति सु पूजायां सुसिक्तं सुस्तुतं अनुपसर्गत्वान्न षः पूजायां किं सुषिक्तं किं तवात्र क्षेपोयं

Digitized by Panjab Digital Library | www.panjabdigilib.org

अतिरतिक्रमणे च अतिक्रमणे इत्याद्यर्थवृत्तिः कर्मप्रवचनीयः स्यात् अति देवान् कृष्णः अपिः पदार्थसंभावनान्ववसर्गगर्हा
समुच्चयेषु एषु द्योत्येषु अपिरुक्तसंज्ञः सर्पिषोपि स्यात् अनुपसर्गत्वान्न षः संभावनायां लिङ् तस्या एव विषयभूते भवने क
र्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन संबध्यते सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बिन्दोरवयवाव
यविभावसंबंधे इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम द्वितीया तु नेह प्रवर्तते सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात्
अपि स्तुयाद्विष्णुं संभावनं शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः अपि स्तुहि अन्ववसर्गः कामचारानुज्ञा धिग्देवदत्तं अपि स्तुयाद्वृष
लं गर्हा अपि सिंच अपि स्तुहि समुच्चये कालाध्वनोरत्यंतसंयोगे इह द्वितीया स्यात् मासं कल्याणी मासमधीते मासं गुडधा
नाः क्रोशं कुटिला नदी क्रोशमधीते क्रोशं गिरिः अत्यंतसंयोगे किं मासस्य द्विरधीते क्रोशस्यैकदेशे पर्वतः स्वतंत्रः कर्ता
क्रियायां स्वातंत्र्येण विवक्षितोर्थः कर्ता स्यात् साधकतमं करणं क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् तमब्ग्रह
णं किं गंगायां घोषः कर्तृकरणयोस्तृतीया अनभिहिते कर्तरि करणे च तृतीया स्यात् रामेण बाणेन हतो वालिः प्रकृत्यादिभ्य उपसंख्या
नं प्रकृत्या चारुः प्रायेण याज्ञिकः गोत्रेण गार्ग्यः समेनैति विषमेणैति द्विद्रोणेन धान्यं क्रीणाति सुखेन दुःखेन वा यातीत्यर्थः दिवः
कर्म च दिवः साधकतमं कर्मसंज्ञं स्याद्वा करणसंज्ञं अक्षैः अक्षान्वा दीव्यति अपवर्गे तृतीया अपवर्गः फलप्राप्तिस्तस्यां द्योत्या
यां कालाध्वनोरत्यंतसंयोगे तृतीया स्यात् अह्ना क्रोशेन वा अनुवाकोऽधीतः फलप्राप्तिः किं मासमधीतो नायातः सहयुक्तेऽप्रधा
ने सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् पुत्रेण सहागतः पिता एवं साकं सार्धं योगेपि विनापि तद्योगं तृतीया वृद्धो यूनेत्यादिनि समं×
र्देशात् येनांगविकारः येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया स्यात् अक्ष्णा काणः अक्षिसंबंधिकाणत्वविशि
ष्ट इत्यर्थः अंगविकारः किं अक्षि काणमस्य इत्थंभूतलक्षणे किंचित्प्रकारमापन्नस्य लक्षणे तृतीया स्यात् जटाभिस्तापसः

Digitized by Panjab Digital Library | www.panjabdigilib.org

ऊढाहाप्यताप्रसक्तविशिष्टाह इत्यर्थः संज्ञोन्यतरस्यां कर्मणि संप्रर्वस्य ज्ञानातेः कर्मणि तृतीया वा स्यात् पित्रा पितरं वा संजा
नीते हेतौ हेत्वर्थे तृतीया स्यात् द्रव्यादि साधारणं निर्व्यापारसाधारणं च हेतुत्वं करणत्वं क्रियामात्रविषयं व्यापारनियतं च दंडे
न घटः पुण्येन दृष्टो हरिः फलमपीह हेतुः अध्ययनेन वसति गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका अलं श्रमेण श्रमेण साध्यं
नास्तीत्यर्थः इह साधनक्रियां प्रति श्रमः करणं शतेन शतेन वत्सान्पाययति पयः शतेन परिच्छिद्य इत्यर्थः अशिष्टव्यवहारे दा
णः प्रयोगे चतुर्थ्यर्थे तृतीया दास्या संयच्छते कामुकः धर्म्ये तु भार्यायै संयच्छति कर्मणा यमभिप्रैति स संप्रदानं दानस्य कर्मणा
यमभिप्रैति स संप्रदानसंज्ञः स्यात् चतुर्थी संप्रदाने विप्राय गां ददाति अनभिहित इत्येव दानीयो विप्रः क्रियया यमभिप्रैति
सोपि संप्रदानं पत्यन्तेने कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा पशुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थः रुच्यर्था
नां प्रीयमाणः रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोर्थः संप्रदानं स्यात् हरये रोचते भक्तिः अन्यकर्तृकोभिलाषो रुचिः हरिनि
ष्ठप्रीतेर्भक्तिः कर्त्री प्रीयमाणः किं देवदत्ताय रोचते मोदकः पथि श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः एषां प्रयोगे बोधयितुमि
ष्टः संप्रदानं स्यात् गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा ज्ञीप्स्यमानः किं देवदत्ताय श्लाघते पथि धारेरुत्तमर्णः
धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात् भक्ताय धारयति मोक्षं हरिः उत्तमर्णः किं देवदत्ताय शतं धारयति ग्रामे स्पृहेरीप्सि
तः स्पृहयतेः प्रयोगे इष्टः संप्रदानं स्यात् पुष्पेभ्यः स्पृहयति ईप्सितः किं पुष्पेभ्यो वने स्पृहयति ईप्सितमात्रे इयं संज्ञा प्रक ३४
र्षविवक्षायां तु परत्वात् कर्मसंज्ञा पुष्पाणि स्पृहयति क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः
स उक्तसंज्ञः स्यात् हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति यं प्रति कोप इति किं भार्यामीर्ष्यति मैनामन्योद्राक्षीदिति क्रोधो
मर्षः द्रोहोपकारः ईर्ष्या अक्षमा असूया गुणेषु दोषाविष्करणं द्रोहादयोपि कोपप्रभवा एव गृह्यन्ते अतो विशेषणं सामान्येन तु प्र

Digitized by Panjab Digital Library | www.panjabdigilib.org

भिक्रोपसृष्टयोः क्रुधद्रुहोरुपसृष्टयोः कर्म सोपसर्गयोरनयोर्योगे यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात् क्रूरमभिक्रुध्यति अभिद्रु-
ह्यति राधीक्ष्योर्यस्य विप्रश्नः १।४।३९ राधीक्ष्योः कारकं संप्रदानं स्यात् यदीयो विविधः प्रश्नः क्रियते कृष्णाय राध्यति ईक्षते पृष्टो गर्गः शु-
भाशुभं पर्यालोचयतीत्यर्थः प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्ता संप्र-
दानं स्यात् विप्राय गां प्रतिशृणोति आशृणोति वा विप्रेण मह्यं देहीति प्रवर्तितः प्रतिजानीत इत्यर्थः अनुप्रतिगृणश्च आभ्यां
गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात् होत्रेऽनुगृणाति प्रतिगृणाति होता प्रथमं शंसति तमध्वर्युः प्रोत्साह-
यतीत्यर्थः परिक्रयणे संप्रदानमन्यतरस्यां नियतकालं भृत्या स्वीकरणं परिक्रयणं तस्मिन्साधकतमं कारकं संप्रदानसं-
ज्ञं वा स्यात् शतेन शताय वा परिक्रीतः तादर्थ्ये चतुर्थी वाच्या मुक्तये हरिं भजति क्लृपि संपद्यमाने च भक्तिर्ज्ञानाय कल्पते
संपद्यते जायत इत्यादि उत्पातेन ज्ञापिते च वाताय कपिला विद्युत् हितयोगे च ब्राह्मणाय हितं क्रियार्थोपपदस्य च कर्मणि
स्थानिनः क्रियार्था क्रियोपपदं यस्य तस्य स्थानिनः प्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् फलेभ्यो याति फलान्याहर्तुमित्य- धं॰
र्थः नमस्कुर्मो नृसिंहाय नृसिंहमनुकूलयितुमित्यर्थः एवं स्वयंभुवे नमस्कृत्येत्यादावपि तुमर्थाच्च भाववचनात् भाववचना-
को॰+ च्चेति सूत्रेण विहितो यस्तदन्ताच्चतुर्थी स्यात् यागाय याति यष्टुं यातीत्यर्थः नमः स्वस्ति स्वाहा स्वधालंवषड्योगाच्च एभिर्योगे चतुर्थी
स्यात् हरये नमः उपपदविभक्तेः कारकविभक्तिर्बलीयसी नमस्करोति देवान् प्रजाभ्यः स्वस्ति अग्नये स्वाहा पितृभ्यः स्वधा
अलमिति पर्याप्त्यर्थग्रहणं तेन दैत्येभ्यो हरिरलं प्रभुः शक्तः समर्थ इत्यादि प्रभ्वादियोगे षष्ठ्यपि साधुः तस्मै प्रभवति स एषां
ग्रामणीरिति निर्देशात् तेन प्रभुर्बुभूषुर्भुवनत्रयस्येति सिद्धं वषडिन्द्राय चकारः पुनर्विध्यर्थः तेनाशीर्विवक्षा-
यां परामपि चतुर्थी चाशिषीति षष्ठीं बाधित्वा चतुर्थ्येव भवति स्वस्ति गोभ्यो भूयात् मन्यकर्मण्यनादरे विभाषाप्राणिषु प्रा-

Digitized by Panjab Digital Library | www.panjabdigilib.org

णिवर्त्तेमन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे न त्वां तृणं मन्ये तृणाय वा अपमाने किं श्वानादिकयोगेन न त्वां तृणं मन्ये अ
प्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्जेष्विति वक्तव्यं तेन न त्वां नावमन्नं मन्य इत्यत्र प्राणित्वेपि चतुर्थी न न त्वां शुने
मन्य इत्यत्र प्राणित्वेपि भवत्येव गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि अध्वनि नेति गत्यर्थानां कर्मणि एते स्तः चेष्टायां
ग्रामं ग्रामाय वा गच्छति चेष्टायां किं मनसा हरिं व्रजति अनध्वनीति किं पंथानं गच्छति गत्वात्र धिष्ठितेध्वन्येवायं निषेधः अ
दहत्यपायात्यपाय एव कर्मणि निषिध्यते तदा चतुर्थी भवत्येव उत्पथेन पथे गच्छति ध्रुवमपायेपादानं अपायो विश्लेषस्तस्मिन्
साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात् अपादाने पंचमी ग्रामादायाति धावतोश्वात्पतति कारकं किं वृक्षस्य पर्णं प
ततीति जुगुप्साविरामप्रमादार्थानामुपसंख्यानं पापाज्जुगुप्सते विरमति धर्मात्प्रमाद्यति भीत्रार्थानां भयहेतुः भयार्थानां त्रा
णार्थानां च योगे भयहेतुरपादानं स्यात् चोराद्बिभेति चौरात्त्रायते भयहेतुः किं अरण्ये बिभेति त्रायते वा पराजेरसोढः प
राजेः प्रयोगे असोढोपादानं स्यात् अध्ययनात्पराजयते सोढुमशक्त इत्यर्थः असोढः किं शत्रून्पराजयते अभिभवतीत्यर्थः
वारणार्थानामीप्सितः वारणार्थानां प्रयोगे ईप्सितोर्थोपादानं स्यात् यवेभ्यो गां वारयति ईप्सितः किं
यवेभ्यो गां वारयति क्षेत्रे अन्तर्द्धौ येनादर्शनमिच्छति व्यवधाने सति यत्कर्तृकस्यादर्शनस्याभावमिच्छति तदपादानं
स्यात् मातुर्निलीयते कृष्णः अन्तर्द्धौ किं चौरान्न दिदृक्षते इच्छतिग्रहणं किं अदर्शनेच्छायां सत्यामसत्यपि दर्शने यथा स्यात्
आख्यातोपयोगे नियमपूर्वकविद्यास्वीकारे वक्ता प्राख्यः स्यात् उपाध्यायादधीते उपयोगे किं नटस्य शृणोति जनि ३५
कर्तुः प्रकृतिः जायमानस्य हेतुरपादानं स्यात् ब्रह्मणः प्रजाः प्रजायन्ते भुवः प्रभवः भूकर्तुः प्रभवस्तथा हिमवतो गंगा
प्रभवति तत्र प्रकाशत इत्यर्थः ल्यब्लोपे कर्मण्यधिकरणे च प्रासादात्प्रेक्षते आसनात्प्रेक्षते प्रासादमारुह्य आसनमुपवि

Digitized by Panjab Digital Library | www.panjabdigilib.org

अपेक्षत इत्यर्थः श्वशुराज्जिह्रेति श्वशुरं वीक्ष्य इत्यर्थः गम्यमानापि क्रियाकारकविभक्तीनां निमित्तं कस्मात्त्वं नद्याः यतश्चाध्व
कालनिर्माणं तत्र पंचमी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्या वनाद्ग्रामो योजनं योजने वा कार्त्तिक्या आग्र
हायणी मासे अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते एतैर्योगे पंचमी अन्य इत्यर्थग्रहणं इतरग्रहणं प्रपंचार्थं अन्यो
भिन्न इतरो वा कृष्णात् आराद्वनात् ऋते कृष्णात् पूर्वो ग्रामात् दिशि दृष्टः शब्दो दिक्शब्दस्तेन संप्रति देशकालवृत्तिना
योगेपि भवति चैत्रात्पूर्वः फाल्गुनः अवयवावयवियोगे तु न तस्य परमाम्रेडितमिति निर्देशात् पूर्वं कायस्य अञ्चूत्तरपदस्य
दिक्शब्दत्वेपि षष्ठ्यतसर्थ इति षष्ठीं बाधितुं पृथग्ग्रहणं प्राक् प्रत्यग्वा ग्रामात् आच् दक्षिणा ग्रामात् आहि दक्षिणाहि ग्रामात्
अपादाने पंचमीति सूत्रे कार्त्तिक्याः प्रभृतीति तद्योगात् प्रभृतियोगे पंचमी भवात्प्रभृति आरभ्य वा सेव्यो हरिः अपपरि
बहिरंचवः पंचम्याः अपाद्बहिर्योगेपि पंचमी ग्रामाद्बहिः अप परी वर्जने एतौ वर्जने कर्मप्रवचनीयौ स्तः आङ् म
र्यादावचने आङ् मर्यादायामुक्तसंज्ञः वचनग्रहणादभिविधावपि पंचम्यपाङ्परिभिः एतैः कर्मप्रवचनीयैर्योगे पंचमी स्या
त् अप हरेः परि हरेः संसारः परिरत्र वर्जने लक्षणादौ तु हरिं परि आ मुक्तेः संसारः आ सकलाद्ब्रह्म प्रतिः प्रतिनिधिप्रतिदान
योः एतयोरर्थयोः प्रतिरुक्तसंज्ञः प्रतिनिधिप्रतिदाने च यस्मात् अत्र कर्मप्रवचनीयैर्योगे पंचमी स्यात् प्रद्युम्नः कृष्णात्प्रति
तिलेभ्यः प्रतियच्छति माषान् अकर्त्तर्यृणे पंचमी कर्तृवर्जितं यद्धेतुभूतं ऋणं ततः पंचमी शताद्बद्धः अकर्तरीति किं शतेन बं
धितः विभाषा गुणेऽस्त्रियां गुणे हेतावस्त्रीलिंगे पंचमी वा स्यात् जाड्यात् जाड्येन वा बद्धः गुणे किं धनेन कुलं अस्त्रियां किं बु
द्ध्या मुक्तः विभाषेति योगविभागाद्गुणे स्त्रियां च क्वचित् धूमादग्निमान् नास्ति घटोऽनुपलब्धेः पृथग्विनानानाभिस्तृतीया
न्यतरस्यां एतैर्योगे तृतीया स्यात् पंचमी द्वितीया च अन्यतरस्यां ग्रहणं समुच्चयार्थं पंचमी द्वितीये अनुवर्तेते पृथग्रामेण रा

Digitized by Panjab Digital Library | www.panjabdigilib.org

मात्रमेवापि एवं विना नाना करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य एभ्यः द्रव्यवचनेभ्यः करणे तृतीया पञ्चमी च स्तो-
स्तोकेन स्तोकाद्वा मुक्तः इत्यत्र स्तोकेन विधिना इत्यतः दूरान्तिकार्थेभ्यो द्वितीया च एभ्यो द्वितीया स्यात् चात् पञ्चमी तृतीये प्रातिपदि-
कार्थमात्रे विधिरयं ग्रामस्य दूरं दूरात् दूरेण वा अन्तिकं अन्तिकात् अन्तिकेन वा असत्त्ववचनस्येत्यनुवृत्तेर्नेह दूरः पन्थाः षष्ठी शेषे कार-
कप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषः तत्र षष्ठी राज्ञः पुरुषः कर्मादीनामपि सम्बन्धविवक्षायां षष्ठ्येव सतां गतं स-
र्पिषो जानीते मातुः स्मरति एधोदकस्योपस्कुरुते भजे शम्भोश्चरणयोः फलानां तृप्तः षष्ठी हेतुप्रयोगे हेतुशब्दप्रयोगे हेतौ द्योत्ये
षष्ठी स्यात् तृतीया च केन हेतुना वसति कस्य हेतोर्वसति निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनं किं निमित्तं वसति केन निमि-
त्तेन कस्मै निमित्ताय इत्यादि एवं किं कारणं को हेतुः किं प्रयोजनमित्यादि प्रायग्रहणाद सर्वनाम्नः प्रथमा द्वितीये न स्तः ज्ञानेन नि-
मित्तेन हरिः सेव्यः ज्ञानाय निमित्ताय इत्यादि षष्ठ्यतसर्थप्रत्ययेन एतद्योगे षष्ठी स्यात् दक्षिणत इति पञ्चम्या अपवादः ग्रामस्य दक्षि-
णतः पुरः पुरस्तात् उपरि उपरिष्टात् एनपा द्वितीया एनबन्तेन योगे द्वितीया स्यात् एनपेति योगविभागात् षष्ठ्यपि दक्षिणेन
ग्रामं ग्रामस्य वा एवमुत्तरेण दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् एतैर्योगे षष्ठी स्यात् पञ्चमी च दूरं निकटं वा ग्रामस्य ग्रामाद्वा ज्ञोऽविद-
र्थस्य करणे जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् सर्पिषो जानीते अधीगर्थदयेशां कर्मणि एषां कर्मणि शेषे
षष्ठी स्यात् मातुः स्मरणं सर्पिषो दयनं ईशनं वा कृञः प्रतियत्ने कृञः कर्मणि शेषे षष्ठी गुणाधाने एधोदकस्योपस्करणं रुजार्था-
नां भाववचनानामज्वरेः भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी चौरस्य रोगस्य रुजा अज्वरिसंताप्योरिति वा- म- ३६
च्यो रोगस्य चौरज्वरः चौरसंतापो वा रोगकर्तृकं चौरसंबंधि ज्वरादिकमित्यर्थः आशिषि नाथः आशीरर्थस्य नाथतेः शेषे कर्मणि
षष्ठी सर्पिषो नाथनं आशिषि किं माणवकनाथनं तत्संबंधिनी याच्ञेत्यर्थः जासिनिप्रहणनाटक्राथपिषां हिंसायां हिंसार्थानामे

Digitized by Panjab Digital Library | www.panjabdigilib.org

षां शेषे कर्मणि षष्ठी चौरस्योज्जासनं निप्रौ संहतौ विपर्यस्तौ व्यस्तौ च चौरस्य निप्रहणनं प्रणिहननं निहननं प्रहणनं वा नट स्यंदने
चुरादिः चौरस्योन्नाटनं चौरस्य क्राथनं वृषलस्य पेषणं हिंसायां किं धानापेषणं व्यवहृपणोः समर्थयोः शेषे कर्मणि षष्ठी स्यात्
द्यूते क्रयविक्रय व्यवहारे चानयोस्तुल्यार्थता शतस्य व्यवहरणं पणनं वा समर्थयोः किं शलाकाव्यवहारः गणनेत्यर्थः ब्राह्म
णपणनं स्तुतिरित्यर्थः दिवस्तदर्थस्य द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य दिवः कर्मणि षष्ठी स्यात् शतस्य दीव्यति तदर्थ
स्य किं ब्राह्मणं दीव्यति स्तौतीत्यर्थः विभाषोपसर्गे पूर्वयोगापवादः शतस्य शतं वा प्रदीव्यति प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने देव
तासंप्रदाने र्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविषो वाचकाच्छब्दात् षष्ठी स्यात् अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य
:अनुब्रूहि वा कृत्वोर्थप्रयोगे कालेधिकरणे कृत्वोर्थानां प्रयोगे कालेवाचिन्यधिकरणे शेषे षष्ठी पंचकृत्वोह्नो भोजनं द्वि
रह्नो भोजनं शेषे किं द्विरहन्यध्ययनं कर्तृकर्मणोः कृति कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् कृष्णस्य कृतिः जगतः कर्ता कृ
ष्णः गौणे कर्मणि वेष्यते नेताश्वस्य स्रुघ्नस्य स्रुघ्नं वा कृति किं तद्धिते मा भूत् कृतपूर्वी कटं उभयप्राप्तौ कर्मणि उभयोः प्राप्तिर्य
स्मिन् कृति तत्र कर्मण्येव षष्ठी स्यात् आश्चर्यो गवां दोहोऽगोपेन स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः भेदिका बिभित्सा वा रु
द्रस्य जगतः शेषे विभाषा स्त्रीप्रत्यय इत्येके विचित्रा जगतः कृतिर्हरेर्हरिणा वा केचिदविशेषेण विभाषां शब्दानामनुशास ×मिछंति×
नमाचार्येणाचार्यस्य वा क्तस्य च वर्तमाने वर्तमानार्थक्तस्य योगे षष्ठी स्यात् न लोकेति निषेधस्यापवादः राज्ञां मतः बुद्धः पू
जितो वा अधिकरणवाचिनश्च क्तस्य योगे षष्ठी इदमेषामासितं न लोकाव्ययनिष्ठाखलर्थतृनां एषां प्रयोगे षष्ठी न स्यात् लादेशाः कु
र्वन् कुर्वाणो वा सृष्टिं हरिः उ हरिं दिदृक्षुः अलंकरिष्णुर्वा उक दैत्यान् घातुको हरिः कमेरनिषेधः लक्ष्म्याः कामुकः अव्ययं ज
गत्सृष्ट्वा सुखं कर्तुं निष्ठा दैत्यान् हतवान् विष्णुना हता दैत्याः खलर्थः ईषत्करः प्रपंचो हरिणा तृन्निति प्रत्याहारः शानच्

Digitized by Panjab Digital Library | www.panjabdigilib.org

विविधत्वाद्धातोरन्यत्वेनोक्तकारकत्वात् सोमं पवमानः नामन्त्र आत्मानं मंस्यमानः ज्ञात्वेव समधीयन्त इन्द्र कर्तृलोकान् छिंद
ज्ञातवीनुस्तस्मात्सुर्वाहिषन् सर्वेषां कारकः षष्ठाः प्रतिषेधः ज्ञोपपष्ठी उस्मादेव वासरणम् अकर्वेन्न नरकस्यात् लिंगसु: अकेनो सवि
षष्ठाधमर्णयोः सविधत्वाकस्यन दिष्यदाधमर्णयोर्येनस्य योगे षष्ठी न स्यात् स्वतः पालकोवनरक्षितरिक्तं गामी ज्ञातदायी कृत्या
नां कर्तरि वा षष्ठी स्यात् मया मम वा सेव्यो हरिः कर्तरीति किं गेयो माणवकः साम्नां न व्याप्य इति कर्तरि यद्विधानादन्यत्र तक
मेऽव्ययोगे विन्नकृते कृत्यानां उत्तयप्राप्ता विविनेति वाऽनुवर्तते तेन नेत्यादि [illegible] तं ज्ञानं गावः कृष्णेन नेतव्याः कर्तरि वा उक्तौ षष्ठी तु
ल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां तुल्यार्थैर्योगे तृतीया वा स्यात् तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा अतुलोपमाभ्यां
किं तुला उपमा वा कृष्णस्य नास्ति चतुर्थी वाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः एतदर्थैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी
आयुष्यं चिरंजीवितं कृष्णाय कृष्णस्य वा भूयात् एवं मद्रं भद्रं कुशलं निरामयं सुखं शं अर्थः प्रयोजनं हितं पथ्यं भूयात् आ
शिषि किं देवदत्तस्यायुष्यमस्ति व्याख्यानात् सर्वत्रार्थग्रहणं मद्रभद्रयोः पर्यायत्वादन्यतरेण न पठनीयः आधारोऽधिकरणं
कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात् सप्तम्यधिकरणे च अधिकरणे सप्तमी स्यात् दूरान्तिका
र्थेभ्यश्च पञ्चम्यधिकौ वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा कटे आस्ते स्थाल्यां पचति मोक्षे इच्छास्ति सर्वस्मिन्नात्मास्ति वनस्य दूरे
अन्तिके वा दूरान्तिकार्थेभ्य इति विभक्ति त्रयेण सह चतसृणां विधानं क्तस्येन्विषयस्य कर्मण्युपसंख्यानं अधीती ३०
व्याकरणे अधीतमनेनेति विग्रहे इष्टादिभ्यश्चेति कर्तरि इनिः निमित्तात् कर्मयोगे निमित्तमिह फलं योगः संयोगसमवायात्मक
वर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरं केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः हेतु तृतीयात्र प्राप्ता सीमाण्डकोशः पुष्क
लको गन्धमृगः योगविशेषे किं वेतनेन धान्यं लुनाति यस्य च भावेन भावलक्षणं यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्त

Digitized by Panjab Digital Library | www.panjabdigilib.org

डीस्यात् गोषु दुह्यमानासु गतः साधुसाधकप्रयोगे च साधुः कृष्णो मातरि असाधुर्मातुले अर्हाणां कर्तृत्वे अनर्हाणामकर्तृत्वे
तद्वैपरीत्ये च सत्सु तरत्सु असत्सु आसते असत्सु तिष्ठत्सु सन्तस्तरन्ति सत्सु तिष्ठत्सु असन्तस्तरन्ति असत्सु तरत्सु सन्तस्तिष्ठन्ति षष्ठी
चानादरे अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः रुदति रुदतो वा प्राव्राजीत् रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः
स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनं
गवां गोषु वा स्वामी गवां गोषु वा प्रसूतः गा एवानुभवितुं जात इत्यर्थः आयुक्तकुशलाभ्यां चासेवायां आभ्यां योगे षष्ठीसप्तम्यौ
स्तः तात्पर्ये आयुक्तो व्यापारितः आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा आसेवायां किं आयुक्तो गौः शकटे ईषद्युक्त इ
त्यर्थः यतश्च निर्धारणं जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः नृणां
नृषु वा ब्राह्मणः श्रेष्ठः गवां गोषु वा कृष्णा गौर्बहुक्षीरा गच्छतां गच्छत्सु वा धावन्तः शीघ्राः छात्राणां छात्रेषु वा मैत्रः पटुः पंचमी विभ
क्ते विभागो विभक्तं निर्धार्यमाणस्य यत्र भेद एव तत्र पंचमी स्यात् माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः साधुनिपुणाभ्यामर्
चायां सप्तम्यप्रतेः आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे मातरि साधुर्निपुणो वा अर्चायां किं निपुणो राज्ञो भृत्य
ः इह तत्त्वकथने तात्पर्यं अप्रत्यादिभिरिति वक्तव्यं साधुर्निपुणो वा मातरं प्रति परि अनु वा प्रसितोत्सुकाभ्यां तृतीया च आ
भ्यां योगे तृतीया स्यात् चात्सप्तमी प्रसितः उत्सुको वा हरिणा हरौ वा नक्षत्रे च लुपि नक्षत्रे प्रकृत्यर्थे मति यो लुप्संज्ञया लुप्प
मानस्य प्रत्ययस्यार्थे वर्तमानात् तृतीयासप्तम्यौ स्तः अधिकरणे मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् मूले श्रवणे इति
वा लुपि किं पुष्ये जाताः सप्तमीपंचम्यौ कारकमध्ये शक्तिमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भो
क्ता कर्तृशक्त्योर्मध्ये यं कालः इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत् कर्तृकर्मशक्त्योर्मध्ये देशः अधिकशब्देन योगे सप्त

Digitized by Panjab Digital Library | www.panjabdigilib.org

मी पंचम्या विधेति तदस्मिन्नधिकमिति अस्मादधिकं वस्तु निर्देशात् लोके लोकाद्वाधिको हरिः अधिरीश्वरे स्वस्वामिसंबंधे
ऽधिः कर्मप्रवचनीयसंज्ञः यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात् उपपरार्द्धे हरे
र्गुणाः परार्द्धादधिका इत्यर्थः ईश्वरे तु स्वस्वामित्वात् पर्यायेण सप्तमी अधि भुवि रामः अधि रामे भूः सप्तमी शौण्डैरिति समासप
क्षे तु रामाधीना अषडक्षेत्यादिना खः विभाषा कृञि अधिः करोतौ प्राक्संज्ञो स्यादीश्वरेर्थे यदत्र मामधिकरिष्यति विनियो
क्तवानित्यर्थः इह विनियोक्तुरीश्वरत्वं गम्यते अगतित्वान्निहि तो दात्तवतीति निघातो न ॥इति विभक्त्यर्थाः॥ समर्थः पदविधिः
पदसंबंधी यो विधिः स समर्थाश्रितो बोध्यः प्राक्कडारात्समासः कडाराः कर्मधारये इत्यतः प्राक्समास इत्यधिक्रिय
ते सह सुपा सह इति योगो विभज्यते सुबंतं समर्थेन समस्यते योगविभागस्येष्टसिद्ध्यर्थत्वात्कतिपयतिङोत्तरपदोयं समास
स्तदंतस्यैव पर्युदस्य अनुव्यचलत् सुपा सुप् सुपा सह समस्यते समासत्वात्प्रातिपदिकत्वे सुपो धातुप्रातिपदिकयोः ए
तयोरवयवस्य सुपो लुक्स्यात् भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः पूर्वं भूतो भूतपूर्वः इवेन समासो विभक्त्यलोपश्च
जीमूतस्येव अव्ययीभावः अधिकारोयं अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चा
द्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु अव्ययमिति योगो विभज्यते अव्ययं समस्यते सोऽव्ययीभावः अथ
मानिर्दिष्टं समास उपसर्जनं समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् उपसर्जनं पूर्वं समासे उपसर्जनं प्राक्प
योज्यं एकविभक्ति चापूर्वनिपाते विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं स्यात् न तु तस्य पूर्वनिपातः गोस्त्रियोरुपसर्ज २८
नस्य उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययांतं च तदंतस्य प्रातिपदिकस्य ह्रस्वः स्यात् अव्ययीभावश्च अव्ययीभावश्चाव्ययं स्यात् नाव्ययीभावाद
तोम्त्वपंचम्याः अदंतादव्ययीभावात्सुपो न लुक् तस्य पंचमीं विना अमादेशः [illegible] अधिहरि

Digitized by Panjab Digital Library | www.panjabdigilib.org

श्योर्मध्यं विदिक् स्त्रियामित्यमरः ॥ तृतीयासप्तम्योर्बहुलं ॥ अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलममभावः स्यात् ॥ अपदि-
शं ॥ अपदिशेन ॥ अपदिशे ॥ बहुलग्रहणात् सुमद्रमुन्मत्तगंगमित्यादौ सप्तम्या नित्यममभावः ॥ [illegible] विभक्त्यादेरर्थे ॥ वि-
भक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह समस्यते सोऽव्ययीभावः ॥ विभक्तौ तावत् हरौ इत्यधिहरि ॥ सप्तम्यर्थस्यैवात्र द्योतको-
ऽधिः ॥ हरिङि अधि इत्यलौकिकविग्रहवाक्यं ॥ अत्र निपातेनाभिहितेऽप्यधिकरणे वचनसामर्थ्यात्सप्तमी ॥ अव्ययीभावश्च ॥ अव्ययमे-
तत्संज्ञकं स्यात् ॥ ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ गोपायति गाः पातीति वा गोपाः ॥ तस्मिन्नधिगोपं ॥ समीपे कृष्णस्य समीपमुपकृष्णं ॥ +अधि+
समया ग्रामं निकषा लंकां आराद्वनादित्यत्र नाव्ययीभावः ॥ अभितः परितः ॥ अन्यारादितरर्ते ॥ इति द्वितीयापंचम्योर्विधानसामर्थ्या-
न्मद्राणां समृद्धिः सुमद्रं ॥ यवनानां व्यृद्धिर्दुर्यवनं ॥ विगता ऋद्धिः व्यृद्धिः ॥ मक्षिकाणामभावो निर्मक्षिकं ॥ हिमस्यात्ययोऽतिहि-
मं ॥ अत्ययो ध्वंसः ॥ निद्रा संप्रति न युज्यत इत्यतिनिद्रं ॥ हरिशब्दस्य प्रकाश इति हरि ॥ विष्णोः पश्चादनुविष्णु ॥ पश्चाच्छब्दस्य नाव्ययी-
भावः ॥ ततः पश्चात्कस्यातद्धितप्रयोगात् ॥ योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः ॥ अनुरूपं रूपस्य योग्य-
मित्यर्थः ॥ अर्थमर्थं प्रति प्रत्यर्थं ॥ प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयत्वविधानसामर्थ्यादयोगे द्वितीयान्तं वाक्यमपि शक्ति-
मनतिक्रम्य यथाशक्ति ॥ हरेः सादृश्यं सहरि ॥ वक्ष्यमाणेन सहस्य सः ॥ ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं ॥ चक्रेण युगपदिति
विग्रहे अव्ययीभावे चाकाले सहस्य सः ॥ संपन्नं तु काले ॥ सचक्रं कालेत्तसहवर्ति ॥ सदृशः सख्या ससखि ॥ सादृश्यार्थेनैव सि-
द्धे सादृश्यपदं गुणभूते सादृश्ये प्राधान्यादिह संबन्धः ॥ क्षत्राणां संपत्तिः सक्षत्रं ॥ ऋद्धेराधिक्यं समृद्धिः ॥ अनुरूप आत्मभा-
वः संपत्तिरिति भेदः ॥ तृणमप्यपरित्यज्य सतृणमत्ति साकल्येनेत्यर्थः ॥ नतु अत्र तृणग्रहणेनाव्ययीभावः ॥ अन्ते अग्निग्रन्थपर्यन्तमधी-
ते साग्नि ॥ यथा ॥ सादृश्ये ॥ सादृश्यवचनयथाशब्दः समस्यते तेनेह न यथा हरिस्तथा हरः ॥ हरेरुपमानत्वं यथाशब्दो द्योतयति

+प+ उ+

Digitized by Panjab Digital Library | www.panjabdigilib.org

तेनसमाहृत्यपदइतिवाइतिवाच्यं शार्थे: आसंनिविष्टे यावदवधारणे यावंतः श्लोकास्तावंतोऽच्युतप्रणामाः यावच्छ्लोकं सुप्प्र
तिनामात्रार्थे शाकस्यलेशः शाकप्रति मात्रार्थेकिं वृक्षंप्रतिविद्योततेविद्युत् अक्षशलाकासंख्याः परिणा द्यूतव्यवहा
रेपराजयेएवायंसमासः अक्षेणविपरीतंवृत्तमक्षपरि शलाकापरि एकपरि विभाषा अधिकारोऽयं एतस्मात्प्राग्वादिवक्षा
वीनानांनित्यसमासत्वं सुप्सुपेतितुननित्यसमासः अव्ययमित्यादिनासमासविधानात्ज्ञापकात् अपपरिबहिरंच
वः पंचम्याः अपविष्णुसंसारः अपविष्णोः परिविष्णुः परिविष्णोः बहिर्वनंबहिर्वनात् प्राग्वनंप्राग्वनात् आङ्मर्यादाभिवि
ध्योः एतयोराङ्पूर्ववत् तेनवासमस्यतेसोऽव्ययीभावः आमुक्तेःसंसारः आमुक्तेः आबालंहरिभक्तिः आबालेभ्यः लक्षणे
नाभिप्रतीआभिमुख्ये आभिमुख्यद्योतकावभिप्रतीचिह्नवाचिनासहप्राग्वत् अभ्यग्निशलभाः पतंति अग्निमभिप्रत्य
ग्नि अभिमुखंप्रति अनुर्यत्समया यंपदार्थंसमयाद्योतनलक्षणस्तेनानुःसमस्यतेसोऽव्ययीभावः अनुवनमशनिर्गतः वन
स्यसमीपंगतइत्यर्थः यस्यचायामः यस्यदैर्घ्यमनुनाद्योत्यतेतेनलक्षणेनानुःसमस्यते अनुगंगंवाराणसी गंगा
याअनुगंगादैर्घ्यसदृशदैर्घ्योपलक्षितइत्यर्थः तिष्ठद्गुप्रभृतीनिच एतानिनिपात्यंतेतिष्ठंतिगावोयस्मिन्कालेसतिष्ठद्गु
दोहनकालः आयतीगवं इद्दन्त्रादेशाः शुवङावविरहः समासांतश्चनिपात्यंते इत्यादि पारेमध्येषष्ठ्यावा पारमध्यशब्दौ
षष्ठ्यंतेनसहवासमस्येते एदंतत्वंचानयोर्निपात्यते पक्षेषष्ठीतत्पुरुषः पारेगंगात्गंगापारात् मध्येगंगात्गंगामध्य ३९
त् महाविकल्पेनवाक्यमपि गंगायाःपारात् गंगायामध्यात् संख्यावंश्येन वंश्याद्विविधाः विद्ययाजन्मनावा तद्वत्स्ववं
श्यः तद्वाचिनासंख्यावासमस्यते द्वौमुनीवंश्यौ द्विमुनिव्याकरणस्य त्रिमुनिविद्यातद्वतामभेदविवक्षायां त्रिमुनिव्याकर
णं एकविंशतिभारद्वाजं नदीभिश्च नदीभिःसंख्यावाप्राग्वत् समाहारेचायमिष्यते सप्तगंगं द्वियमुनं अन्यपदार्थेचसंज्ञा

Digitized by Panjab Digital Library | www.panjabdigilib.org

वा । अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते संज्ञायां विभाषाधिकारे ऽपि वाक्येन संज्ञानवगमादिह नित्यसमा
सः । उन्मत्तगंगं लोहितगंगं नाम देशः । समासान्ताः इत्यधिकृत्य । अव्ययीभावे शरत्प्रभृतिभ्यः । शरदादिभ्यष्टच् स्यात् समासां
तो ऽव्ययीभावे शरदः समीपं उपशरदं प्रतिविपाशं शरद् विपाश् अनस् मनस् उपानह् दिव् हिमवत् अनडुह् दृश् दि
श् चेतस् चतुर् त्यद् तद् यद् कियत् जराया जरस् च उपजरसं प्रतिपरसमनुभ्यो ऽक्ष्णः । यस्येति च प्रत्यक्षं अक्ष्णोः परम् इति विग्रहे
समासान्तविधानसामर्थ्यादव्ययीभावः । परोक्षे लिटि निपातनात् परस्य ओकारादेशः । परोक्षं परोक्षा क्रियेत्यादि तु अर्शआद्यचि
समक्षं अन्वक्षं । अनश्च । अन्नन्ताद् अव्ययीभावाट्टच् स्यात् । नस्तद्धिते । नान्तस्य भस्य टेर्लोपः स्यात्तद्धिते उपराजं अध्यात्मं । नपुंसकादन्य
तरस्यां । अन्नन्तं यत् क्लीबं तदन्ताद् अव्ययीभावाट्टज्वा उपचर्मं उपचर्म । नदीपौर्णमास्याग्रहायणीभ्यः । वा टच् । उपनदं उपनदि । उ
पपौर्णमासं उपपौर्णमासि । झयः । झयन्ताद् अव्ययीभावाट्टज्वा । उपसमिधं उपसमित् । गिरेश्च सेनकस्य । गिर्यन्ताद् अव्ययीभावाट्ट
ज्वा सेनकमते । उपगिरं उपगिरि इत्यव्ययीभावः । तत्पुरुषः । अधिकारो ऽयं प्राग्बहुव्रीहेः । द्विगुश्च । द्विगुरपि तत्पुरु
षसंज्ञः स्यात् । इदं सर्वं तत्पुरुषवाक्यं संख्यापूर्वो द्विगुरिति पठित्वा चकारबलेन संज्ञासमावेशः स्यात् तत्पुरुषत्वात् समासान्तप्रयो
जनं पंचराजं । द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह समस्यते वा स तत्पु
रुषः । कृष्णं श्रितः कृष्णश्रितः । दुःखातीतः । गम्यादीनामुपसंख्यानं । ग्रामं गमी ग्रामगमी अन्नं बुभुक्षुः । स्वयं क्तेन । द्वितीयेति
न संबध्यते ऽयोग्यत्वात् । स्वयंकृतस्यापत्यं स्वायंकृतिः । खट्वा क्षेपे । खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्य
ते निन्दायां खट्वारूढो जाल्मः । नित्यसमासो ऽयं न हि वाक्येन निन्दा गम्यते । सामि । सामिकृतं । कालाः । क्तेनेत्येव अनत्यन्तसंयोगा
र्थं वचनं मासप्रमितः प्रतिपच्चन्द्रः । मासं परिच्छेत्तुमारब्धवान् । अत्यन्तसंयोगे च । काला इत्येव । अक्तान्तार्थं वचनं मुहूर्तं सुखं

Digitized by Panjab Digital Library | www.panjabdigilib.org

गुडखंडेतुरवं तृतीया तत्कृतार्थेनगुणवचनेन तत्कृतेनगुणवचनेन तृतीयकं तृतीयांतं तृतीयार्थकृतगुणवचनेनार्थेनाद्देनच

सह प्राग्वत् शंकुलया खंडः शंकुलाखंडः धान्येनार्थो धान्यार्थः तत्कृतेति किं अक्ष्णा काणः पूर्वसदृशसमोनार्थकलहनिपु

णमिश्रश्लक्ष्णैः तृतीयांतमेतैः प्राग्वत् मासपूर्वः मातृसदृशः पितृसमः ऊनार्थे माषोनं कार्षापणं माषविकलं वाक्कलह

: आचारनिपुणः गुडमिश्रः आचारश्लक्ष्णः मिश्रग्रहणे सोपसर्गस्य ग्रहणं मिश्रं चानुपसर्गमसंधौ इति ज्ञापकात् अनुपसर्गग्रह

णात् गुडसंमिश्राः धानाः अवरस्योपसंख्यानं मासेनावरो मासावरः कर्तृकरणे कृता बहुलं कर्तृकरणे च तृतीयाव

कृतेप्राग्वत् हरिणा त्रातो हरित्रातः नखैर्भिन्नो नखभिन्नः कर्तृग्रहणं गतिकारकपूर्वस्यापि ग्रहणं नखैर्निर्भिन्नः कृता किं

काष्ठैः पचतितरां कृत्यैरधिकार्थवचने स्तुतिनिंदाफलकमर्थवादवचनमधिकार्थवचनं तत्र कर्तृकरणे च तृतीयांतं कृत्यै

:सह प्राग्वत् काकपेया नदी वातच्छेद्यं तृणं अन्नेन व्यंजनं संस्कारकद्रव्यवाचकं तृतीयांतमन्नेन प्राग्वत् दध्ना उपसिक्त ओद

ध्योदनः इहोत्तरत्रोपसेकक्रियाद्वारा सामर्थ्यं भक्ष्येण मिश्रीकरणं गुडेन धानाः गुडधानाः मिश्रण क्रियाद्वारा सामर्थ्यं

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यंतार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यंतं वा प्राग्वत् तदर्थेन प्रकृतिविकृति

भाव एव बलिरक्षितयोर्ग्रहणाज्ज्ञापकात् यूपाय दारु यूपदारु नेह रंधनाय स्थाली अश्वघासादयस्तु षष्ठीसमासः अर्थेन

नित्यसमासो विशेष्यलिंगता चेति वक्तव्यं द्विजायायं द्विजार्थः सूपः द्विजार्था यवागूः द्विजार्थं पयः भूतबलिः गोहितं गोसु ५०

खं गोरक्षितं पंचमी भयेन चोरात् भयं चोरभयं भयभीतभीतिभीभिरिति वाच्यं वृकभीतः अपेतापोढमुक्तपतितापत्रस्तैरल्पशः

एतैः सह अल्पंचम्यंतं समस्यते सुखापेतः कल्पनापोढः चक्रमुक्तः स्वर्गपतितः तरंगापत्रस्तः अल्पशः किं प्रा

सादात्पतितः स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन स्तोकान्मुक्तः अल्पान्मुक्तः अंतिकादागतः अभ्याशादागतः दूरादागतः विप्र

Digitized by Panjab Digital Library | www.panjabdigilib.org

कस्मादागतः कृच्छ्रादागतः पंचम्याः स्तोकादिभ्य इत्यलुक् षष्ठी राज्ञः पुरुषो राजपुरुषः याजकादिभिश्च ए ति: षष्ठ्यंते समस्यते तृजका
कास्यां कर्तरीत्यस्य प्रतिप्रसवोयं ब्राह्मणयाजकः देवपूजकः गुणांतरेण तरलोपश्चेति लोपः इति वक्तव्यं तरबंतं यत् गुणवाचि
तेन समासः न निर्धारण इति पूरणगुणेति च प्रतिषेधस्य प्रतिप्रसवोयं सर्वेषां श्वेततरः सर्वश्वेतः सर्वेषां महत्तरः सर्वमहान्
कर्तृयोगाच्च षष्ठी समस्यत इति वाच्यं इध्मप्रव्रश्चनः न निर्धारणे निर्धारणे या षष्ठी सा न समस्यते नृणां द्विजः श्रेष्ठः प्रतिपदविधाना
षष्ठी न समस्यत इति वाच्यं सर्पिषो ज्ञानं पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन पूरणाद्यर्थैः सदादिभिश्च षष्ठी
गुणेन॰ न समस्यते पूरणे सतां षष्ठः गुणः काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्लाः यदा प्रकरणादिना दंतादि इति विशेष्यं ज्ञातं तदेदमुदाह
रणं अनित्योयं निषेधः संज्ञाप्रमाणत्वात् इत्यादिनिर्देशात् तेनार्थगौरवं बुद्धिमांद्यमित्यादि सिद्धं सुहितार्थास्तृप्त्यर्थाः फला
नां सुहितः तृतीयासमासस्तु स्यादेव स्वरे विशेषः सत् द्विजस्य कुर्वन् कुर्वाणो वा किंकर इत्यर्थः अव्ययं ब्राह्मणस्य कृत्वा सर्वो
त्तरस्मात् तवयोश्च तदव्ययमेव गृह्यते तेन तदुपरि इत्यादि सिद्धमिति रक्षितः तव्यः ब्राह्मणस्य कर्तव्यं तव्यता तस्यैव स्वकर्त
स॰ व्यं स्वरे भेदः समानाधिकरणे तक्षकस्य सर्पस्य विशेषणसमासस्तु स्यादेव कुलस्य पदलग्नगोधेनोरित्यादि शेषो टाप्सुवत्तीत्यादौ
नां विरक्तं तरेत्र इतार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोप्यनेन वार्यते क्तेन च पूजायां मतिबुद्धिपूजार्थेभ्यश्चेति विहितो यः
क्तः तदंतेन षष्ठी न समस्यते राज्ञां मतः बुद्धः पूजितो वा राज्ञां पूजित इत्यादौ तु क्तेनेति न समस्त तृतीयांतस्य समासः अधि
करणवाचिना च क्तेन षष्ठी न समस्यते इदमेषामासितं गतं भुक्तं वा कर्मणि च उभयप्राप्तौ कर्मणीति या षष्ठी सा न समस्य
ते आश्चर्यो गवां दोहो गोपेन तृजकाभ्यां कर्तरि कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः अपां स्रष्टा वज्रस्य भर्ता ओदनस्य पा
चकः कर्तरि किं इक्षूणां भक्षणमिक्षुभक्षिका पत्यर्थभर्तृशब्दस्य याजकादित्वात् समासः तृतीयाकर्मणि हितावताति

द्रोविर्द्रुमसक त्रिंगर्ह्येदयेवाका लिंगाञ्जः प्रतिवाके लज्ञा वर्णितः लावृति नि त्रितिवाशु ज्ञा कि चि प्रद्रुम लिंगा दि द्वय वेवर्णनोः समर्थश्च गदि वलवर्ण लक्षिषण सृष्ट्वा आति दितत्तर्थ

मत्ते त्रिभुवनविधातृश्च कस्य इति शेषषष्ठ्याः समास इति कैयटः कर्त्तरि च कर्तृषष्ठ्या अकेन न समस्यते तत्तः आदि
कानि इह ट्टुभुवर्त्तते उभयप्राप्तौ कर्मणि इति हितत्वेन कर्तृषष्ठ्याः अप्राप्तावात् नित्यं क्रीडाजीविकयोः एतयोरर्थयोरकेन नित्यं ष
ष्ठी समस्यते उद्दालकपुष्पभंजिका क्रीडाविशेषस्य संज्ञा संज्ञायामिति सा वेण्वुल् जीविकायां दंतलेखकः तत्र क्रीडा
यां विकल्पे जीविकायां इकका स्यात् कर्त्तरि इति निषेधप्राप्ते वचनं पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे अवयविनास
ह पूर्वादयः समस्यंते एकत्वसंख्याविशिष्टश्चेदवयवी षष्ठीसमासापवादः पूर्वं कायस्य पूर्वकायः अपरकायः एकदे
शिना किं पूर्वं नाभेः कायस्य एकाधिकरणे किं पूर्वश्छात्राणां सर्वेप्येकदेशोक्ता समस्यते संख्याविशेषविशिष्टा पकाल
मध्याह्नः सायाह्नः केचित्तु सर्वैकदेशः कालेन समस्यते न त्वेकत्वव्यापकस्य सामान्यापेक्षकत्वात् तेन मध्यरात्रः उपार
ताः पश्चिमरात्रः गोवराद्यादिसिद्धमित्याहुः अर्धं नपुंसकं समांशवाची अर्धशब्दो नित्यं क्लीबे स प्राग्वत् एकविभक्तावषष्ठ्य
न्तवचनं एकदेशिसमासविषयको यमुपसर्जनसंज्ञानिषेधः तेन पंचखट्वीत्यादि सिध्यति अर्धं पिप्पल्या अर्धपिप्पली
क्लीबे किं ग्रामार्धः द्रव्यैक्य एव अर्धं पिप्पलीनां द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां एतान्येकदेशिना सह प्राग्वत् द्वि
तीयं भिक्षायाः द्वितीयभिक्षा एकदेशिना किं द्वितीयं भिक्षाया भिक्षुकस्य अन्यतरस्यांग्रहणसामर्थ्यात् पूरणगुणेति निषेधं बा
धित्वा पक्षे षष्ठीसमासः भिक्षाद्वितीयं प्राप्तापन्ने च द्वितीयया प्राप्तापन्नो द्वितीयया श्रितेति समासः प्राप्तो जीविकां प्राप्तजीविकः जीवि ५१
कां प्राप्तः आपन्नजीविकः जीविकापन्नः इह सूत्रे द्वितीयाअ इति छित्वा अकारोपि विधीयते तेन जीविकां प्राप्ता स्त्री प्राप्तजी
विका आपन्नजीविका कालाः परिमाणिना परिच्छेद्यवाचिना सुबंतेन सह कालाः समस्यंते मासो जातस्य स मासजातः
द्व्यहजातः द्वयोरह्नोः समाहारो द्व्यहः द्व्यहो जातस्येति विग्रहः उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसं

Digitized by Panjab Digital Library | www.panjabdigilib.org

ख्यानं रूढ्नदीज्ञानस्य यस्य लक्षणातः अक्षोऽक्षं इति वर्त्तमाणो ज्ञादेशाः पूर्वत्र तु न संख्यादेः समाहारे इति निषेधः सप्तमी
शौण्डैः सप्तम्यंतं शौण्डादिभिः प्राग्वत् अक्षेषु शौण्डः अक्षशौण्डः अधिशब्दोऽत्र पठ्यते अध्युत्तरपदादिति खः ईश्वराधीनः सिद्ध
शुष्कपक्वबंधैश्च एतैः सप्तमी प्राग्वत् सांकाश्यसिद्धः आतपशुष्कः स्थालीपक्वः चक्रबंधः ध्वांक्षेण क्षेपे ध्वांक्षवाचिना सह सप्त
म्यंतं प्राग्वत् तीर्थध्वांक्ष इव तीर्थध्वांक्षः तीर्थकाकः कृत्यैर्ऋणे सप्तम्यंतं कृत्यप्रत्ययांतैः सह प्राग्वत् आवश्यके मासदेयमृ
णं पूर्वाह्णेगेयं साम संज्ञायां सप्तम्यंतं सुपा प्राग् संज्ञायां वाक्येन संज्ञानवगमान्नित्यसमासोऽयं अरण्येतिलकाः वनेकसेरु
काः क्तेनाहोरात्रावयवाः अहोरात्रावयवाः सप्तम्यंताः क्तांतेन सह प्राग्वत् पूर्वाह्णकृतं अपररात्रकृतं अवयवग्रहणात्किं
अह्नि दृष्टं तत्र तत्रेत्येतत् सप्तम्यंतं क्तांतेन सह प्राग्वत् तत्रभुक्तं क्षेपे सप्तम्यंतं क्तांतेन प्राग्वन्निंदायां अवतप्तेनकुलस्थितं
एतत्र पात्रेसमितादयश्च एते निपात्यंते क्षेपे पात्रेसमिता भोजनसमय एव संगता न तु कार्ये गेहेशूरः गेहेनर्दी आकृतिग
णोऽयं चकारोऽवधारणार्थः तेनैषां समासांतरे घटकतया प्रवेशो न पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकर
णेन पूर्वकालिकवचनमापरकालिकवचनेन समानाधिकरणेन एकादयश्च सप्तम्यंते विशेषणं विशेष्येणेति सिद्धे पूर्व
निपातार्थं नियमार्थं सूत्रं एक शब्दस्य दिक्संख्ये संज्ञायामिति नियमार्थं पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः एक बाधना×
नाथः सर्वयाज्ञिकाः जरन्नैयायिकाः पुराणमीमांसकाः नवपाठकाः केवलवैयाकरणाः दिक्संख्ये संज्ञायां समानाधिक
रणेनेत्या पादपरिसमाप्तेरधिकारः संज्ञायामेवेति नियमार्थं सूत्रं पूर्वेषुकामशमी सप्तर्षयः नेह उत्तरा वृक्षाः पंचब्राह्मणाः
तद्धितार्थोत्तरपदसमाहारे च तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत् पूर्वस्यां शालायां भवः
पौर्वशालः समासे कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः आपरशालः पूर्वा शाला प्रिया य

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्येति त्रिपदे बहुव्रीहौ कृते प्रियाज्ञा इत्युत्तरपदे पूर्वयोस्तत्पुरुषः तेन ज्ञालाज्ञा इति आकार उदात्तः पूर्वत्र ज्ञालाप्रियः द्विगुसमा
हारो नास्य न तिष्ठ नाव संख्यायास्तद्धितार्थे बहुनां मातृणामपत्यं षाण्मातुरः पंचगावो धनं यस्येति त्रिपदे बहुव्रीहावंतरत
त्पुरुषस्य विकल्पे प्राप्ते द्वंद्व तत्पुरुषयोरुत्तरपदे नित्यसमासवचनं गो [illegible] रस्तद्धितलुकि गोस्तात्पुरुषाट्ट्रचा समासांतो नतु त
द्धितलुकि पंचगवधनः पंचानां गवां समाहारः संख्यापूर्वो द्विगुः तद्धितार्थेति प्रोक्तः संख्यापूर्वो द्विगुः स्यात् द्विगुरेकवचनं द्वि
गुर्थः समाहार एकवत् स नपुंसकमिति नपुंसकत्वं पंचगवं कुत्सितानि कुत्सनैः कुत्स्यमानानि कुत्सनैः सह प्राग्वत् वैयाक
रणखसूचिः मीमांसकदुर्दुरूढः पापाणके कुत्सितैः पूर्वसूत्रापवादः पापनापितः अणककुलालः उपमानानि सामान्य
वचनैः घनश्यामः इह पूर्वपदस्य स्यात् इत्ये ला कणिकमिति सर्वथैव लौकिकविग्रहे इव शब्दः प्रयुज्यते पूर्वनिपातनि
यमार्थमिदं उपमितिव्याघ्रादिभिः सामान्याप्रयोगे उपमेयं व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्याप्रयोगे सति विशेष्य
स्य पूर्वनिपातार्थमिदं पुरुषव्याघ्रः नृसोमः व्याघ्रादिराकृतिगणः सामान्याप्रयोगे किं पुरुषो व्याघ्र इव शूरः विशेषणं विशे
ष्येण बहुलं भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत् नीलमुत्पलं नीलोत्पलं बहुलग्रहणात् कृष्णसर्पः
कचिन्न रामो जामदग्न्यः पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च पूर्वनिपातनियमार्थमिदं पूर्ववैयाकरणः
अपराध्यापकः अपरस्माद्दिपश्चाद्भावो वक्तव्यः अपरश्चासावर्धश्च पश्चार्धः कथमेकवीर इति पूर्वकालैकेति बाधित्वा परत्वाद ४२
नेन समासे वीरैकः स्यात् बाहुलकात् इति विभाति श्रेण्यादयः कृतादिभिः श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यं अश्रेणयः श्रेणयः
कृताः श्रेणीकृताः केन नञ् विशिष्टेनानञ् कृतं च तदकृतं च कृताकृतं शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसं
ख्यानं शाकप्रियः पार्थिवः शाकपार्थिवः देवब्राह्मणः सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः सद्वैद्यः वक्ष्यमाणेन महत

Digitized by Panjab Digital Library | www.panjabdigilib.org

आकारः महावैयाकरणः। पूज्यमानैः किं। उत्कृष्टो गौः पंकादुद्धृत इत्यर्थः। वृंदारकनागकुंजरैः पूज्यमानं। गोवृंदारकः। व्याघ्रादे
राकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनं। कतरकतमौ जातिपरिप्रश्ने। कतरकठः। कतमकलापः। गोत्रं च चरणैः सहेति
जातित्वं। किं क्षेपे। कुत्सितो राजा किंराजा यो न रक्षति। पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्या
पकधूर्तैर्जातिः। एतैः सह समानाधिकरणः कर्मधारयः। पुंवत्कर्मधारयजातीयदेशीयेषु। कर्मधारये जातीयदेशीययो
श्च परतो भाषितपुंस्कात्परं ऊङभावो यस्मिन् तथाभूतं पूर्वं पुंवत्। पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी कृ
ष्णचतुर्दशी महाप्रिया। तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री। दत्तभार्या। पंचमभार्या।
स्त्रीघृताचीसुकेशीभार्या ... एवं पाचकजातीया। पाचकदेशीया। इत्यादि। इभपोटा। पोटा स्त्रीपुंसलक्षणा। इभयु
वतिः। अग्निस्तोकः। उदश्वित्कतिपयं। गृष्टिः सकृत्प्रसूता। गोगृष्टिः। धेनुर्नवप्रसूतिका। गोधेनुः। वशा वंध्या। गोवशा। वेहद्गर्भघाति
नी। गोवेहत्। बष्कयणी तरुणवत्सा। गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। कठाध्यापकः। कठधूर्तः। प्रशंसावचनैश्च। एतैः
सह जातिः प्राग्वत्। गोमतल्लिका। गोमचर्चिका। गोप्रकांडं। गवोद्धः। गोतल्लजः। प्रशस्ता गौरित्यर्थः। मतल्लिकादयो नियतलिं
गाः न तु विशेष्यलिंगाः। जातिः किं। कुमारी मतल्लिका। युवा खलतिपलितवलिनजरतीभिः। पूर्वनिपातनियमार्थं सूत्रं। लिं
गविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते। युवा खलतिः। युवखलतिः। युवतिः खलती। युवखलतिः। युवत्यामेव जरतीध
र्मेयिलं तेन न बहुव्रीहिप्रायं सामानाधिकरण्यं। कृत्यतुल्याख्या अजात्या। भोज्योष्णं। तुल्यश्वेतः। सदृशश्वेतः। अजात्या किं। भोज्य ओ
दनः। प्रतिषेधसामर्थ्यादिह त्रिपदसमासोऽपि न। वर्णो वर्णेन समानाधिकरणेन सह प्राग्वत्। कृष्णसारंगः। कडाराः कर्मधारये। क
